Sri Sathya Sai Sadhana Trust

Publications Division, Prasanthi Nilayam

# CHAMAKAM

*3rd Anuvaka*

शं च मे मयश्च मे

śaṁ ca me mayaśca me

प्रियं च मेऽनुकामश्च मे

priyaṁ ca me'nukāmaśca me

कामश्च मे सौमनसश्च मे

kāmaśca me saumanasaśca me

भद्रं च मे श्रेयश्च मे

bhadraṁ ca me śreyaśca me

वस्यश्च मे यशश्च मे

vasyaśca me yaśaśca me

भगश्च मे द्रविणं च मे

bhagaśca me draviṇaṁ ca me

यन्ता च मे धर्ता च मे

yantā ca me dhartā ca me

क्षेमश्च मे धृतिश्च मे

kṣemaśca me dhṛtiśca me

विश्वं च मे महश्च मे

viśvaṁ ca me mahaśca me

संविच्च मे ज्ञात्रं च मे

saṁvicca me jñātraṁ ca me

सूश्च मे प्रसूश्च मे

sūśca me prasūśca me

सीरं च मे लयश्च म

sīraṁ ca me layaśca ma

ऋतं च मेऽमृतं च मे

ṛtaṁ ca me'mṛtaṁ ca me

अयक्ष्मं च मेऽनामयच्च मे

ayakṣmaṁ ca me'nāmayacca me

जीवातुश्च मे दीर्घायुत्वं च मे

jīvātuśca me dīrghāyutvaṁ ca me

अनमित्रं च मेऽभयं च मे

anamitraṁ ca me'bhayaṁ ca me

सुगं च मे शयनं च मे

sugaṁ ca me śayanaṁ ca me

सूषा च मे सुदिनं च मे ॥३॥

sūṣā ca me sudinaṁ ca me ||3||

Sri Sathya Sai Sadhana Trust Publications Division